# mahAgaNapatistotram

# મહાગણપતિસ્તોત્રમ્

## Document Information

Text title : mahAgaNapati stotram 1

File name : mahAgaNapatistotra.itx

Category : ganesha, stotra

Location : doc_ganesha

Author : shriiraaghavvchaitanya

Transliterated by : Available at webdunia.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : April 23, 2004

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# મહાગણપતિસ્તોત્રમ્

યોગં યોગવિદાં વિધૂત-વિવિધ-વ્યાસંગશુદ્ધાશય-
પ્રાદુર્ભૂત-સુધારસ-પ્રસૃમર-ધ્યાનાસ્પદાધ્યાસિનામ્ ।
આનન્દપ્લવમાન-બોધમધુરા-ઽઽમોદચ્છટામેદુરં
તં ભૂમાનમુપાસ્મહે પરિણતં દન્તાવલાસ્યાત્મના ॥ ૧॥

તારશ્રી-પરશક્તિકામવસુધા-રૂપાનુગં યં વિદુસ્તસ્મૈ
સ્તાત્પ્રણતિર્ગણાધિપતયે યો રાગિણાઽભ્યર્થ્યતે ।
આમન્ત્ર્ય પ્રથમં વરેતિ વરદેત્યાર્તેન સર્વં જનં
સ્વામિન્ મે વશમાનયેતિ સતતં સ્વાહાદિભિઃ પૂજિતઃ ॥ ૨॥

કલ્લોલાંચલ-ચુમ્બિતામ્બુદ-તતાવિક્ષુદ્રવામ્ભોનિધૌ
દ્વીપે રત્નમયે સુરદ્રુમવનામોદૈકમેદસ્વિનિ ।
મૂલે કલ્પતરોર્મહામણિમયે પીઠેઽક્ષરામ્ભોરુહે
ષટ્કોણા કલિત-ત્રિકોણરચના-સત્કર્ણિકેઽમું ભજે ॥ ૩॥

ચક્રપ્રાસ-રસાલ-કાર્મુક-ગદા-સદ્બીજપૂરદ્વિજ-
વ્રીહ્યગ્રોત્પલ-પાશપંકજકરં શુણ્ડાગ્રજાગ્રદ્ઘટમ્ ।
આશ્લિષ્ટં પ્રિયયા સરોજકરયા રત્નસ્ફુરદ્ ભૂષયા
માણિક્યપ્રતિમં મહાગણપતિં વિશ્વેશમાશાસ્મહે ॥ ૪॥

દાનામ્ભઃ-પરિમેદુર-પ્રસૃમર-વ્યાલમ્બિરોલમ્બભૃત્
સિન્દૂરારુણ-ગણ્ડમણ્ડલયુગ-વ્યાજાત્ પ્રશસ્તિદ્વયમ્ ।
ત્રૈલોક્યેષ્ટ વિધાનવર્ણસુભગં યઃ પદ્મરાગોપમં
ધત્તે સ શ્રિયમાતનોતુ સતતં દેવો ગણાનાં પતિઃ ॥ ૫॥

ભ્રામ્યન્ મન્દરઘૂર્ણનાપરવશ-ક્ષીરાબ્ધિવીચિચ્છટા-
સચ્છાયાશ્ચલ-ચામર-વ્યતિકર-શ્રીગર્વસર્વઙ્કુષાઃ ।
દિક્કાન્તાઘન-સારચન્દનરસા-સારાઃશ્રયન્તાં મનઃ
સ્વચ્છન્દપ્રસર-પ્રલિપ્તવિયતો હેરમ્બદન્તત્વિષઃ ॥ ૬॥

મુક્તાજાલકરમ્બિત-પ્રવિકસન્-માણિક્યપુંજચ્છટા-
કાન્તાઃ કમ્બુકદમ્બ-ચુમ્બિતઘનામ્ભોજ-પ્રવાલોપમાઃ ।
જ્યોત્સ્નાપૂર-તરંગ-મન્થરતરત્-સન્ધ્યાવયસ્યાશ્ચિરં
હેરમ્બસ્ય જયન્તિ દન્તકિરણાકીર્ણાઃ શરીરત્વિષઃ ॥ ૭॥

શુણ્ડાગ્રાકલિતેન હેમકલશેનાવર્જિતેન ક્ષરન્
નાનારત્નચયેન સાધકજનાન્ સમ્ભાવયન્ કોટિશઃ ।
દાનામોદ-વિનોદલુબ્ધ-મધુપ-પ્રોત્સારણાવિર્ભવત્
કર્ણાન્દોલનખેલનો વિજયતે દેવો ગણગ્રામણીઃ ॥ ૮॥

હેરમ્બં પ્રણમામિ યસ્ય પુરતઃ શાણ્ડિલ્યમૂલે શ્રિયા
બિભ્રત્યામ્બુરુહે સમં મધુરિપુસ્તે શઙ્ખચક્રે વહન્ ।
ન્યગ્રોધસ્ય તલે સહાદ્રિસુતયા શમ્ભુસ્તથા દક્ષિણે
બિભ્રાણઃ પરશું ત્રિશૂલમિતયા પાશાઙ્કુશાભ્યાં સહ ॥ ૯॥

પશ્ચાત્ પિપ્પલમાશ્રિતો રતિપતિર્દેવસ્ય રત્યોત્પલે
બિભ્રત્યા સમમૈક્ષવં ધનુરિષૂન્ પૌષ્પાન્ વહન્ પઞ્ચ ચ ।
વામે ચક્રગદાધરઃ સ ભગવાન્ક્રોડઃ પ્રિયઙ્ગોસ્તલે
હસ્તોદ્યચ્છુકશાલિમંજરિકયા દેવ્યા ધરણ્યા સહ ॥ ૧૦॥

ષટ્કોણાશ્રિષુ ષટ્સુ ષડ્ગજમુખાઃ પાશાઙ્કુશાભીવરાન્
બિભ્રાણાઃ પ્રમદાસખાઃ પૃથુમહાશોણાશ્મ-પુઞ્જત્વિષઃ ।
આમોદઃ પુરતઃ પ્રમોદસુમુખૌ તં ચાભિતો દુર્મુખઃ
પશ્ચાત્ પાર્શ્વગતોઽસ્ય વિઘ્ન ઇતિ યો યો વિઘ્નકર્તેતિ ચ ॥ ૧૧॥

આમોદાદિગણેશ્વર-પ્રિયતમાસ્તત્રૈવ નિત્યં સ્થિતાઃ
કાન્તાશ્લેષરસજ્ઞ-મન્થરદૃશઃ સિદ્ધિઃ સમૃદ્ધિસ્તતઃ ।
કાન્તિર્યા મદનાવતીત્યપિ તથા કલ્પેષુ યા ગીયતે
સાઽન્યા યાપિ મદદ્રવા તદપરા દ્રાવિણ્યમૂઃ પૂજિતાઃ ॥ ૧૨॥

આશ્લિષ્ટૌ વસુધેત્યથો વસુમતી તાભ્યાં સિતાલોહિતૌ
વર્ષન્તૌ વસુપાર્શ્વયોર્વિલસતસ્તૌ શંખપદ્મૌ નિધી ।
અંગાન્યન્વથ માતરશ્ચ પરિતઃ શક્રાદયોઽબ્જાશ્રયા-
સ્તદ્બાહ્યેઃ કુલિશાદયઃ પરિપતત્કાલા નલજ્યોતિષઃ ॥ ૧૩॥

ઇત્થં વિષ્ણુ-શિવાદિ-તત્વતનવે શ્રીવક્રતુણ્ડાય

હુંકારાક્ષિપ્ત-સમસ્તદૈત્ય પૃતનાવ્રાતાય દીપ્તત્વિષે ।
આનન્દૈક-રસાવબોધલહરી વિધ્વસ્તસર્વોર્મયે
સર્વત્ર પ્રથમાનમુગ્ધમહસે તસ્મૈ પરસ્મૈ નમઃ ॥ ૧૪॥

સેવા હેવાકિદેવા-સુરનરનિકર-સ્ફાર-કોટીર-કોટિ-
કાટિવ્યાટીકમાન-દ્યુમણિસમમણિ-શ્રેણિભાવેણિકાનામ્ ।
રાજન્નીરાજનશ્રી-સખચરણનખ-દ્યોતવિદ્યોતમાનઃ
શ્રેયઃ સ્થેયઃ સ દેયાન્ મમ વિમલદૃશો
બન્ધુરં સિન્ધુરાસ્યઃ ॥ ૧૫॥

એતેન પ્રકટરહસ્યમન્ત્રમાલા-ગર્ભેણ
સ્ફુટતરસંવિદા સ્તવેન ।
યઃ સ્તૌતિ પ્રચુરતરં મહાગણેશં તસ્યેયં
ભવતિ વશંવદા ત્રિલોકી ॥ ૧૬॥

॥ ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યવર્ય-
શ્રીરાઘવચૈતન્યવિરચિતં મહાગણપતિસ્તોત્રં સમાપ્તમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

---

*mahAgaNapatistotram*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*